कं समाख्यातं मोक्षार्थे विनियोगकः उद्यत्सूर्यसहस्रा
भां शशांककृतशेखरां पद्मासनां स्मेरमुखीं स्तनैर्द
त्रिविलोचनां रत्नवस्त्रपरीधानपाशांकुशवरांकैः
दधतीं भुवनेशानीं ध्यायेद्रत्नांकजे शिवाम् इतिध्या
नम् वाग्भवं नवशिवे प्रियबीजं ध्यायते यदि नरो व
लब्धेनः नस्यतत्स्मरणाद्भुजमात्राजायते हिकमला
वनस्थमी १ शक्तिबीजमनन्तसुधाकरं साधको यदि
जपेद्धृदि भक्त्या नस्य सर्वगललनास्मरणाद्गौरजयंति
मस्तकैर्मे गणाधुसैः २ मायाबीजे यो जपेन्महेशान
त्वंमे श्रीभक्तिमान्सक्रिकोटी तत्र हस्यापानि तद्धाम
रम्यं नाकस्त्रीभिर्वीज्यमग्नः स्वनालैः ३ तत्त्वं भ्रमध्ये भु
वनेश्वरीति येनामरम्भापरिरम्भकोटी ध्यायेद्यदद्रे
गाशिरं वेउतद्रे समयातिरम्भापरिरम्भसर्गं ४ मायांगां
यासाधको ध्यायते तं तस्य त्रयस्य विश्वशिवदयाले
देवापादौ रजयंति स्म नित्यं मौलिस्फुलैर्गिरीन्द्रनीलाभ
रत्नैः ५ नतत्त्वरूपिणी भवत्सत्वमध्ये योजपेन्नवसुधा
करसाद्रवां देवि नस्य खिलसाधकराशौ विश्वमेनद
ग्विलं वशमेति ६ सर्वबीजं देवि मंत्रार्थसंस्पराजेव

भु·
रह·
६६
69

वक्त्रिर्वायनेयोहृदंतः भूमौरूपास्तस्यपादाब्जयुग्मं
जेति स्वैमौलिरत्नांशुभिस्तः १ इतीदंपरमंतत्वंतत्वं
विद्यास्तुपोनमम् रहस्यं भुवनेश्वर्याः सर्वस्वंसमया
वेति संस्तुत्य भवनेशानीयः पठेत्साधको नमः तस्या
द्यैसिद्धयेदेवि करस्थामहेश्वरी अस्यस्तवस्यदेवेशि
प्रभावंकथितंमया नास्यहं भुवनेश्वर्याः पंचवक्त्रैन
संशयः इत्येशपटलोदेवि रहस्यातिरहस्यकः अभक्ते
भ्योनदातव्यो गोपनीयो महेश्वरी इतिश्रीभुवनेश्व
रीरहस्येतन्त्रविद्यलीलाख्येः पटलोनवमः ९ ॥ ॥
श्रीभैरवः मंत्रसाधनकंवक्ष्ये रहस्यंसर्वमंत्रिणां येन
साधनमात्रेण मंत्रः सिद्धिमुपैष्यति विनोत्कीलनमं
त्राणाविना संजीवनेनतथा विनाशापहरीं नैवमंत्रसिद्धि
प्रदायकः संपुटेनविनादेवि प्राणैस्तान्प्राणवल्लभे वि
धानेसकलेदद्याजपेत्यावेतिजापकः मनोः श्रीभुव
नेश्वर्याः स्यादुत्कीलनमन्नमम् वारत्रयंपठेदादौमू
लमंत्रस्यैवपरां मंत्रस्यभुवनेश्वर्याभवेत्संजीवनंप
रम् मायांभैरवशापंचसौवपहृदयंसंचले मायाम्
द्भुवनेश्वर्याविधियेशापहारिणी ततः सिद्धमनुंदेवि
जपेन्मांत्रिकमन्नमः पश्चाच्छापान्मानतोदद्यात्संपुटं
साधकेश्वरः यंविधायभवेद्देवि सर्वसौख्यमयः सर्वा

विद्यांतेचपरावीजंदशवारंपठेत्सुखे मंत्रोयंभुवने
श्वर्याः संप्रदायः ससिद्धिदः एवंसंस्कृतमीशानिम
न्त्रंदेव्याजपेत्सदा सर्वसिद्धिमवाप्नोतिसाधकोमंत्र
साधकः इत्येषपटलोदेविसाधनाख्यो महेश्वरि तव
स्नेहान्मयाप्युक्तोगोप्यः साधकोत्तमैः इतिश्रीभुव
नेश्वरीरहस्येउत्कीलनादिपटलोदशमः १० ॥ ॥
श्रीभैरवउवाच अधुनाशिवविद्यांतेवक्ष्यामिपरमा
द्भुतां सर्वसिद्धिमयींसाध्यांसर्वतंत्रेषुगोपिताम्
केवलंयोजपेच्छाक्तंमंत्रंशैवंनतोजपेत् जन्मको
टिप्रजप्तोपिनमंत्रसिद्धिभाग्भवेत् यस्माद्देव्यास्तयो
देवः शिवस्तंसाधकोभजेत् ईश्वरोभुवनेश्वर्याः
शिवइत्येवईश्वरी ईश्वरस्यमंत्रंवक्ष्येसर्वसिद्धिकरंप
रम् तारंमाभूनिदालक्ष्मीरीश्वरायस्मरीततः मंत्रो
यमीश्वरस्योक्तः साधकेष्टफलप्रदः अस्यमंत्रस्यदे
वेशि ऋषिःप्रोक्तःसदाशिवः छंदोनुष्टुप्समाख्यातमी
श्वरोदेवतास्मृतः बीजंचप्रणवः शक्तिर्मायारमाकील
कंस्मृतम् धर्मार्थकाममोक्षार्थेविनियोगःप्रकी
र्तितः तारमायारमाबीजैर्मायासंघहृदीर्घसंप्रतैः ऊ
र्यात्करांगयोर्देविसाधकोभीष्टसिद्धये अथध्यानं
प्रवक्ष्यामिसर्वकामार्थसिद्धिदम् शुद्धस्फटिकसं

भु॰
स्व॰र॰
१॰
70

काशंत्रिनेत्रमीश्वरं प्रभुम् सिंहचर्मपरीधानं गजच
र्मोत्तरीयकम् सुधापूर्णकलशं शूलं वरं चाभयमे
व च धारयन्तं करांभोजैः शशांककृतशेखरं पद्मा
सनं स्थितं मुखैर्वामांगोत्संगत्रिनेत्रम् भुवनेश्वरीं म
हादेव्या हृन्मध्ये भावयाम्यहम् अनेन ध्यानराजेन म
नसा चिंतयेन्नच विद्या हि भुवनेश्वर्याः कलौ सिद्ध
तिसत्वरम् इत्येष पटलो देवि शिवमंत्रप्रकाशकं
गोपनीयो महेशानि साधकेस्यात्मसिद्धये इति श्री
भुवनेश्वरीशिवमंत्रप्रकाशः पटलः एकादशः ॥
श्रीभैरव उवाच दीक्षाविधिं प्रवक्ष्यामि साधकानां हिते
च्छया विधायविधिवद्दीक्षां पशुनाम्नाविपश्यते दी
यते परमां सिद्धिं लीयते कर्मवासना अध्यते परमं
धाम तेन दीक्षा स्मृता शिवे ब्रह्मादिकीटपर्यंतं ज
गत्सर्वं महेश्वरि पशुनमोहितं देवि तस्माद्दीक्षां च व
कलौ श्रीदेवीसेवया देवि चक्रार्चनपुरःसरः साध
कः पशुभावेन मंत्रोक्तानं भजेत्ततः दीक्षितो या
ति वरां दीक्षाहीनो भवेत्पशुः दीक्षितस्तु भवेज्ज्ञा
नी पशुभावविवर्जितो विभुः सर्वपातकमुक्तो हि लभे
त्परमां गतिम् यस्य दीक्षा शिवेनास्ति जीवन्तं
ते च जन्मनः सज्ञानेनादूरे देवि निरयात्मुनियंकं

ञ्चित् दीक्षाहीनस्य देवेशि पशोः कल्पितजन्मनः पापौ
घानि कर्माणि निष्फलं हि पलायते तस्मात्यत्नेन
दीक्षितो भाग्यात्संस्कृतिभिः कृतमा वाल्ये वा यौवने वा
पि वार्धक्ये पि ह्यवश्यं हि अन्यथा नरयौ पापी पितॄन्
स्वान्निरयं नयेत् अन्ते पशुर्दनहे सोसर्पयोनिं व्रजे
च्छिवे एवं प्राणापार्जितं प्राप्य वासनापरमार्थदाम्
गुरुं कुलीनं तत्त्वज्ञं सर्वाङ्गः सुमनोरमम् लब्ध्वा भ
क्त्या प्रणम्यादौ तोषयित्वा विशेषतः प्रणामैर्वन्दने
दैर्विविधैर्नित्यमेव एवं कर्म सिद्धस्याज्ञा विनिर्णीतां दी
क्षां देवीं यथा विधि गृह्णीयान्नरयाभक्त्या साधको
येन जायते गुरुश्च शिष्यश्च रत्नांशः सर्वाङ्गैः सुमनोर
मम् गुरुभक्तिरतं वालं कुलीनं गर्भदीक्षितम् देवी
भक्तिरतं भक्त्या पापभीतं कृतात्मकम् इत्यादीनां
पदं दयान्वितभागी भवेत्ततः श्रीदेवीः भगवन्करु
णाम्भोधे साधकानां हितेच्छया कदा दीक्षा प्रदातव्या
साधकेषु तद्वदस्व मे श्रीभैरवः सुदिने शुभनक्षत्रे
कान्तावयने द्वये नवरात्रिदिने पित्रोश्राद्धे हेमन्तनिवा
सरे नववर्षदिने देवि चन्द्रसूर्योपरागके शिवरात्र्यां
स्वजन्मनैव दीनां दयार्द्रचित्ताः नक्षत्रे शुभनक्षत्रेत्वा
तास्मरन्भैरवम् गगनानन्दीतं देवितया देवालये

भु॰
स्व॰ र॰
७१
71

क्वचित् देवताग्रे गुरुं नत्वा नत्वा संतोषहेतवे श्रीपं
चापरमं स्वर्णं देवानामपि दुर्लभम् देवतायतनं
वापि ग्रामाश्वग्रामे ततः तत्र देवान्मनेदेवि सर्वा
श्चगुरुं समर्पयेत् भूतानि सार्य देवेशि मेगणाश्च
देवताः मातृकादिगुरुतासीनचोत्तराभि स्वं शिष्य
म् संस्थाप्य विधिवद्देवि देवीमन्त्रा परामयः देवता
येयराश्रीमे दीक्षां दद्याद्यथाविधिः कालमूले महा
विद्यां श्रीविद्यां साधकेश्वरः आनंदाश्रुकहृदयः शा
नैक्तिः क्तिः समर्पयेत् ध्वजशास्य च गायत्र्यास्ततो
मृत्युंजयस्य च इष्टदेवाः शिवस्थापिततो विद्यां समर्प
येत् शिष्यो दीक्षां संप्राप्य गुरुमभ्यर्च्य शक्तितः तोषयि
त्वाग्रणामाभिः दक्षिणाभिर्विभिर्भावैः तदाप्नोति महसादा
यजयाव परमेश्वरि यंत्रंमंत्रं च माला च पंचांग परमेश्वरि
पुनर्नीत शिवे शिष्यो गुरुर्वापि न दर्शयेत् इति दीक्षावि
धिः सारभूतो गुह्यो महेश्वरि पटलः साधकेंद्रेण प्रका
श्योमम वक्त्रभिः इति श्रीभुवनेश्वरीरहस्ये दीक्षाविधिप
टलो द्वादशः ॥ – ॥ श्रीभैरव उवाच अथ देवि प्रवक्ष्या
मि पुरश्चरणमनुत्तमम् यत्समासाद्य नरा देवि मंत्रः कल
द्रमो भवेत् एकादश्यां दिने देवि समन्ताच्छ्रेष्ठपर्यंतिका पुर
श्चरणां कर्मोदाचारे श्योन्नाथकोत्तमः वर्णालक्षं जपेन्मं

त्रेनदर्पवसरेश्वरी यकलत्ताविधिंकुर्यादतोन्यथंकरा
वन ईश्वरुवाच लक्षजप्तोमन्त्रे देवियदिकल्पद्रुमोभवेत्
तदाकिंसाधकोलोकेलभेतत्वंवदस्वमे कस्यहस्तेन
मंत्रस्यपुरश्चरणाकक्रियाम् कारयेत्साधकेश्चेनसंश
यंछिंदिपूजेदे भैरवः साधुपृष्टंत्वयादेविश्रुणुत्ववरव
र्णिनि नकदाचित्स्वयंकुर्यात्तदामंत्रपुरश्चक्रियाम्
गुरुहस्तेनदेवेशिसाधकस्यकरेणवा कुर्यान्मंत्रवर
स्यास्यपुरश्चरणाकक्रियाम् जीवहीनोयथादेहःस
र्वकर्मसुनक्षमः पुरश्चरणहीनोहितमंत्रःसिद्धिदायि
कः जपाद्दशांशतोहोमस्तद्दशांशेनतर्पणम् मार्जनं
तद्दशांशेनतद्दशांशेनभोजनम् मंत्रस्यादौप्रसाद
श्चेत्स्वयंकुर्यात्पुरश्चक्रियाम् तदाज्ञांप्राप्यवेद्यथंतेत्रे
धिवद्धतंयथा तस्यास्यगुरुहस्तेनसाधकस्यकरेणवा
वा पुरश्चर्यांत्वमंत्रस्यकारयेत्साधकोनमः पुरश्चरणा
संकल्पंदत्वादौगुरवेशिवे जपंयथाविधिंकुर्यात्तुकृ
त्यमनोप्रिये गुरोःपादप्रसादेनपुरश्चर्याफलंशिवे
गृह्णीयात्साधकोदेवियुरुंसंतोषयेत्ततः दक्षिणाभिः
शुभैर्वस्त्रैर्यथाविभवमात्मनः ततःस्वयंपुरश्चर्यावक्रीः
कुर्यात्साधकः येनमंत्रःकलौशीघ्रमष्टसिद्धिप्रदोभवे
त् पर्वताग्रेनदीतीरेदेवतायतनेतथा एकांतेचश्वै

मं०
स्मृ०२०
३२

देशेजयेत्रियतमानसः ब्रह्मचर्यपरोवीरो मितोहारो-
जितेंद्रियः स्मरन्नेमन्त्रसरेदंमंत्रजेन्मनिग्रहंन्तथा चाह
मूलफलानीरदधिभिक्ताव्रतसाधकः शाकस्याहविर्ये-
वात्रसाधकस्योच्यतेबुधैः तदपिप्रशस्तनान्यः संनचा
श्लिष्टंनचाधिकम् मद्वकौः संस्थेषकंचऊर्यो दैलकभो-
जने नेंद्रियाणांविकारः स्यान्तथाभुंजीतसाधकः य-
द्वातस्त्रायरीमाज्यंदुग्धानंकल्पितंफलम् प्रशस्तंत्रसम
श्रीयान्मंत्रसिद्धिंसमीहया यथोक्तस्याप्रसिद्धिस्यात्तत्
णावनसंशयः शाकमेवस्हविष्याशीकलौलत्तत्रयत्न
येत् यतिश्चब्रह्मचारीचभिक्षान्नजीविनोमतौ सर्वेप
मेवलिभूतागृहीभिक्षान्नजीवनात् लवणंपलकंचैव
ताराँतोहरमांतरम् माषमुद्गमसूरात्सांतोरवांश्चण
कानपि अमद्वाषणामनाध्यंवर्जयेदत्रएजनम् वि
नाभ्रमोविनंनिमंमयनैमित्तिकंचयेत् स्त्रीशूद्रपति
तव्रात्यनास्तिकोच्छिष्टभाषणाम् असत्यभाषणंचैव
कौटिल्यंचपरिवर्जयेत् सद्भिरपिनभाषेतनापहोमा
वेनादिषु वाग्यतः कर्मनिवर्त्यनिःस्पृहश्चवेनादिषु
वर्जयेद्गीतकाव्यादिश्रवणंनृत्यदर्शनम् ताम्बूलंगं
धलेपंचपुष्पंनारीणामेवच मधुतैलकलापंतद्गोष्ठी-
चपरिवर्जयेत् कौटिल्यंनोटमपांगामनिवेदितभोज

नम् असंकल्पितहुतं च वर्जयेत्तर्दनादिकम् स्नायाभि
पंचगव्येन केवलामलकेन च स्कृनिस्नानागमोक्तेव मं
त्रैः स्नानायादनंतरम् स्नाने त्रिषवणंप्रोक्तमष्टकोटि
सकोनथा अस्नानस्य फलेनाप्तेन वानर्पयतः पित्त
पुरश्चरणकालेन तद्धोमावसरे तथा मूलेनमैकल
लेन कृत्वा होमं दशांशतः साधकेन विधेनापि दर्श
हौहोममाचरेत् तर्पयेत्तहितो देवीं भोजयेत्साधकं
स्ततः पुरश्चर्याविधिश्चैव वर्णितः फलसंदरि अथ
वान्यप्रकारेण पुरश्चरणमिष्यते अष्टम्यां वा चतुर्दश्यां
पक्षयोरुभयोरपि सूर्योदयात्समारभ्य यावत्सूर्योदः
यो भवेत् तावज्जमा निरातंको मंत्रः कल्पद्रुमो भवेत्
चेंद्रसूर्यग्रहे वापि यावद्विधिविमुक्तिदः तावत्संख्यम
न्नजेत्सम्यक्त्वा होमादिकं चरेत् सर्वसिद्धीश्वरो मंत्रो भवे
त्साधकवाग्ने शरत्काले रवौ देवि जपेन्मंत्रं यथाविधि
निशीथे रचयेद्धोमं तन्नन्मलाहुतिं शिवे तत्क्षणात्सा
धको देवि सत्यं योपि सुभं लभेत् अथवान्यप्रकारेण
पुरश्चरणमिष्यते गुरुमानीय संस्थाप्य देवतापूजनं
चरेत् वस्त्रालंकारहोमाद्यैः संतोष्य गुरुमेव च तत्सं
नत्सुतांश्चैव तत्स्य पत्नीं तथैव च पूजयित्वा मनुं जसा
सर्वसिद्धीश्वरो भवेत् गुरुवेदनिर्णात्यथायथाविभि

भु॰
श्व॰र॰
७२
73

वमात्मनः गुरोरनुज्ञामात्रेणात्तु इह मंत्रोपि सिध्यति जा-
पश्चात्तत्त्वतां ध्यायेद्ध्यानं श्रीनैस्तत्त्वतां जपेत् । जपध्याना-
समायुक्तो मंत्री सिध्यति नान्यथा ॥ इत्येष पटलो गुह्यो मे
न्त्रसारमयोद्भवम् । अप्रकाश्योप्रदातव्यो नाख्येयो बहुल
वादिभिः ॥ इति श्रीभुवनेश्वरीरहस्ये गुरुस्मरणविद्यानाम
पटलाष्टादशः १८ ॥ ० ॥ श्रीभैरव उवाच ॥ ०
अथ होमविधिं वक्ष्ये सर्वतंत्रेषु गोपितं । सांस्त्रीभुवने
श्वर्या मंत्रराजस्य पार्वति । ध्यानादेवी परादेवि गुरुरूपा
त्वा सम्यक्किकम् । जपेच्छ्रीचक्रपुरतो निषीद्य मंत्रमीश्वरि
अयुतं लक्षमेकं वा दशांशं होममाचरेत् । कोटिलक्ष
प्रजप्तस्य मंत्रस्याक्षरसंहतेः विनादशांशहोमेन न ता-
त्फलमवाप्नुयात् । विना श्मशानगमनं नित्यहोमं न पा-
दयाः नास्ति सिद्धं निर्वाणो हे कलौ भैरवशापतः हुतपा
यसमध्वीकागुडपुष्पसिताक्तैः होमो दशांशतः का
र्यो जपस्य सर्वदा क्षिते पंचामृतेन देवेशि तद्दशांशेन
मार्जयेत् तर्पं विनादशांशेन पंचामृतमयं विसर्पीः
भोजनं विनादशांशेन दीनितां च द्विजोत्तमः ततो देवि ब्र
ह्मण्यां फलमाप्नोति साधकः अन्यथा सिद्धिहानिः स्यात् ज-
मस्यापि मनोः सदा । देव्युवाच यस्यै नेतावद् यस्यै नेताव
तीमाकृतिहोमं कर्तुं दशांशतः सकथं क्रियते होममत्र

रस्वमहेश्वरि श्रीभैरवः यस्य होमं शिवे कुर्वन्ते शाकिनी-
लिदशांशतः न सम्पूर्णं भवेत्तस्य कौलिकानां हितायव
शुभे हिमाद्यं देवेशि गतोपवनमंडलम् श्मशाने सम्पु-
रोच्यक्तो हेवापरमेश्वरि श्मशानं प्रणमेद्भक्त्या साध-
कः साधकैः समम् ज्वालाकरालवदने कल्पान्तदहने-
प्रिये प्राणिप्राणालये दूते चित्तमेतत्प्रहं कुरु इति न-
त्वा महादेवि स्मशानादिस्थितभैरवान् निवसेत्तत्र रात्रौ तु
कुर्याद्धोमं कुलेश्वरि श्मशानादि शिवे देवेशि श्रीचक्रं तु
विभावयेत् संपूज्य विधिवन्मंत्रं दिक्पालांस्तत्र पार्वति
गणेशं पूजयेत्तत्र पूजयेत्कुलयोगिनी तन्मूर्वतः ख
नेत्कुण्डं रुद्रनेत्रास्यं च विधया त्रिकोणं कुर्मीशानि ह
स्तायोगायमहिजे हस्तैकविस्तृतं विश्वकुसिद्धकं
विभावयेत् बिन्दुं त्रिकोणं षट्कोणं वसुपत्रं त्रिवृत्तं
भूगृहांकं मयाख्यातं वह्निचक्रं कुलाचिते गणेशं यमे
वरुणः कुबेरसहितः ततः पूजनीया विशेषेण गंधाक्ष-
तधूपनैवेद्यैः ब्राह्म्याद्यमातरः पूज्याश्चासिताङ्गाद्यश्च भैरवाः
वसुपत्रेषु संपूज्य वह्निचक्रे महेश्वरि मायाच मोहिनी
चैव लज्जा या च मनोन्मना मुक्तकेशी च मातंगी महेश्वा
नी षट्पत्रके त्रिकोणे यमुना गंगा संपूज्याश्च सरस्वती
बिन्दौ श्रीभुवनेशानीं गंधाक्षतप्रसूनकैः बिंदावणितम

भु॰ मर्च्यमूलमंत्रेणामात्रिकः वह्निमावाह्यमूलेनतदावार
रह॰र॰ नमुद्रया ॐ ह्रैं रां वह्नये स्वाहा मंत्रेणोत्तिसरेश्वरि वह्निं
७५ मूलेनसंस्कृत्योत्कृतानाम्न्यूनमीश्वरि दशांशहोमसंक
ल्पाकुर्यान्मूलसाधकः मालयार्तितिणोदयादाकुली
नांशनत्रयम स्त्राज्ञानीलविग्रहमस्त्रानल्तवक्रौजुनेष्मि
ये पुष्पैर्मूलेनाज्यमिश्रैस्ततोरद्याद्वलिप्रिये मकारैः
पंचभिर्देवि पुनजन्मावश्यवेदवेत् स्वाज्ञानीलांशनदद्या
द्धोमरमयोमरवः ततः साधकचक्रस्यतत्त्वियस्यचपा
देति एतांविद्यापचक्रोत्सिंलोषयेदविभिर्गुह्यम् स्त्री
शीघ्रिर्वर्षयेत्तत्र्योनाश्रुतोगिरियोभवेत् तत्रियोपि
वरेनत्रपुरश्चर्याफलंमतोः लभत्सतसाधकश्रेष्ठततः
सर्वांकृतिंडनेत् ततोवमंपठेद्देवियेनदेवीमयोभवेत्
ततोदेवींचशिवांमंत्रीसंहारमुद्रया साधकोत्स्वयेद्धि
नादैर्भक्त्यापानादिभिः शिवे विसृज्यसाधकान्देवीस
शिवांमपरिक्कदम पुरश्चर्याफलंप्राप्यसाधकोमुक्ति
भाग्भवेत् इत्येषषट्पटलोदितोहोमस्तनामपोक्रवम
मर्वतनैकतिलयोगोपनीयोमस्तनाभिः इतिश्रीभुवने
श्वरीरहस्येहोमविद्यापटलः चतुर्दशः १४ ॥ श्रीभैर
वः ॥ प्रथनाचक्रमानेवन्यासिनयानेरितिवरदा
भवितायांअग्यश्रीभुवनेश्वरीपकाहशापिकारैव

साधकाः परमार्थज्ञः प्रकारदशापि चक्रे न वर्णिताः सा
धकास्तु भाः उत्तमा न च देवेशि मध्यमा पंच साधकाः अध
मास्त्रयो देवि न मन्त्रः चक्रमध्यगाः विना चक्रार्चनं नै
व निन्दा पूजाजपादयः फलदा योगिनीशापान्नस्यात्सु
कं प्रपूजयेत् अहङ्कारौ तु संक्रान्तिं निवन्देश्याष्टमी शुच
नवम्यां मंगले चक्रे पूजा जपाश्च शुभप्रदा साधकाश्च स
नीकाश्च मिलिता शयमंदिरे देवतापतने वापि श्मशान
स्थं गारके यद्वा दिगम्बरे भैरवान्देवि विचार्य परसाधक
उपविश्यासने देवि संशोध्य वीरमंडले साधकान्नप
विश्याग्र कर्णान्मेकस्य साधवान् नानाविधापसर्वांगभ
न स्त्रक्षादिके चरेत् नवप्राणान्स्तनिशाम्य श्रीचक्रे पूज
यच्छिवे आत्मनाश्रीचक्रयोर्मध्ये कुम्भस्थापनमाचरेत्
गौडीमाध्वीनयायेष्टी वामस्व पूजयेच्छिवे पतेषां रसमा
स्वादनत्वाभैरवार्चने आनंदरसपूजायां नष्टेपोप
रमेश्वरी विप्राश्चनत्रिधावेश्याः स्मृतः पूज्यस्तपावनाः
गौडी विप्रैश्च सुभद्रा माध्वीत्तत्रैश्च वा नमा वैश्यैश्च सुभ
द्रा पैष्टी स्मृद्रेश्च ब्राह्मणसत्तम ब्रह्मतत्त्रियवैश्यानां मानं
दत्तस्वभावतः आसवं हरतत्स्याज्जं साधके तत्तु शुद्धता
भिः स्वभावेन सदानन्दरसानां परमेश्वरि मधुनापूजा
येद्देवि देवमानन्दभैरवम् इत्थं संशोध्य देवेशि मकार

भु॰ ज्यं च शोधयेत् श्रीचक्राग्रेर्चयेत्तत्र साधकान्भैरवागमे
स्र॰र॰ तत्र संपूजयेत्तेशं देवमानंदभैरवम् योगिनीः पूजये
७५ त्तत्र वटुकं पूजयेत्ततः गणेशं क्षेत्रपालांश्च पूजयेत्स्व
75 कनायकाः संतर्पयेद्देवान्पितॄंश्च मुनीन्देवान्महेश्वरि
श्रीचक्राग्रे जपेन्मूलं पठेत्कवचमेश्वरि मंत्रनामसह
स्रं च स्तोत्रं ततस्त्रिरूपिणाम् ततो देव्यै वलिं दत्वा साध-
केभ्यः पंचयेच्छिवे भैरवां स्तर्पयेद्दृष्ट्वा दीक्षितांस्तर्पयेत्ततः
उत्तमं नवपात्राणि पंचपात्राणि मध्यमम् त्रयमेवा-
णि पत्राणि चैकपात्रेण पूजनम् यत्नैर्भैरवोत्तमैः सर्वे-
वर्णोद्दिजातया निष्टैर्भैरवैस्तत्रैः सर्ववर्णोपरस्थस्य
कः तत्र कन्याः समभ्यर्च्य वीरेशो भैरवार्चनम् रेतसा-
तर्पयेद्देवीं कुलकोटिसमुद्धरेत् शक्त्याच्छिष्टं पिबेद्-
वं वीरोच्छिष्टं च वर्णानाम् मकारपंचसंयुक्तं कुर्याच्छीव
क्रममुत्तमम् मृगरूढं पूजयेत्तत्र तर्पयेच्छक्तितः परम्
तोषयित्वा गुरुं देवि दक्षिणाभिश्च वंदनैः ततश्चांशि
रसा दापयेत्कर्पोदाने रमात्मनः इत्येष पटलो देवि विवक्त
सर्वस्वं मेश्वरि तव भक्त्या मयाख्यातो गोपनीयः प्रयत्न-
तोभिः इति श्रीभुवनेश्वरीरहस्ये चक्रपूजाविधिपटलः
पंचदशः १५ ॥ श्रीभैरवः शृणु देवि प्रवक्ष्यामि सा-
रात्सारतरं परम् स्त्राचाराणां विधिं येन कलौ देवीप्र-

सोऽदत्ति हैमागोवागमे स्यात्तं वामाचारस्तु दक्षिणः न
योऽसत्त्वं कुलाचारः शृणु तेषां विधिं शिवे साधकोत्त्री
त्तिनो भूत्वा येन सिद्धिमवाप्नुयात् तद्दशामि तवेश्वर
त्रिचारो विधेयं तु हत्सने प्रथमो दक्षिणाचारो विधिस्तेषां
शृणु प्रिये प्रभाते स्नानसंध्यादि मध्याह्ने जपमेश्वरि
गैरेणमासनं मामार्थं भस्त्रं पायसशर्करैः मालारुद्राक्ष
संभूता पात्रं पाषाणसंभवम् भोगः स्वकीयं कान्तामि
दक्षिणाचारस्तु पयम् द्वयोगमथुना देवि सिद्धिहानि
करो मतः वामे चारं प्रवक्ष्यामि भुवनेश्वरः समापनम्
ये विधाय कलौ शीघ्रं मांत्रिकः सिद्धिभाग्भवेत् मालान्
देन संभूता पात्रं पाषाणमण्डकम् ग्रासनं सिंहचर्माद्
केकरणं स्त्रीकचोद्भवम् द्रव्यमासवतन्नाद्यं भक्ष्यमां
सादिकं शिवे चर्वणं वालमत्स्यादि श्रद्धावीणारवाः क
ग्याः मैथुनेपरकान्ताभिः सर्ववर्णसमानता वामाचा
द्द्रतिसोक्तः सर्वसिद्धिप्रदः शिवे अन्यथा सिद्धिहानिस्या
मेत्रस्मात्प्रियमहेश्वरि तस्माद्वामं भजेन्नित्यं वाममेवच
रागतिः दक्षिणं च कुलं चैव वीरैः साधकसत्तमैः स्या
त्संहत्य कलौ देवि वाममेव भजेत् कलौः कुलाचारश्च व
न्द्यामि सद्योभोगाभिरुत्तमैः कुलमिपं कुलगुरुं कुलदे
वीं महेश्वरि नित्यं यत्नजयद्धिसंस कुलाचार उच्यते कु

भु॰
स्तु॰र॰
१९
76

लक्षितं शिवेनाज्ञानानानाम महेश्वरि हृद्गतानीयममम्
ज्ञानयाभोगं विधायच रेतस्मान्तर्यमे देवीं चक्रेशीं भुव
नेश्वरीम् ईश्वरं चैव विधिनाजपं कुर्याद्विशेषतः नम
वं कं च रेडं मं कुलकां ता विभूषयेत् पानैः येयैस्तया
भक्ष्यैः मंत्रमप्यं कुलयोषितम् श्रमहं चैव वरे देवं कुलाचा
रे इति स्मृतः रमाचारपरो देवि कुलस्त्रीगुरुपूजनकः
वामाचारपरो मंत्री मुक्तिभाग्भविता ध्रुवम् इत्येषपट
लो गुप्तो देव्याश्चारनवल्लभः प्रदातव्योपि भक्तेभ्योन
प्रकाश्यो मम भक्तिभिः ॥ इति श्रीभुवनेश्वरीरहस्ये पंचां
गविनाम पटलः षोडशः १६ ॥ श्रीभैरव उवाच ॥
शृणु शक्रक्रयां मध्य पूजां मामयि कीं पराम् येनश्च व
णामा त्रेणा कोटि पूजाफलं भवेत् विना मम यपूजाया
देवी दीक्षापि निष्फला तस्मान्मम यपूजां तेवत्सामिप
रलौकिकीम् न सिद्ध्यन्ति महादेवि विना मम पूजाजपाद
यः यत्नेन मादृयो देवि विना मम पूजया श्रेष्ठा
शान्ते प्राप्याः सम पापा संतिपार्वति तेषु पाः पूजये दे वि
देवीं श्रीभुवनेश्वरीम् मयाति परमेशानि श्रीदेवीग
णानां परम् तेषाम पि महादेवि मम याः सन्निवेना मा:
सर्वग्रहणकालो वा चंद्रग्रहणवासरः भूकम्पसमयो
देवि नवरात्रिदिनानि च कन्यासंक्रान्तिसमये देवाना

मपि दुर्लभः पत्रेषु समयेष्वेवं यः शिवां पूजयेच्छिवे स
साक्षाद्भैरवो ज्ञेयो वरदानक्षमः शिवः ब्रह्माद्यैः पूजनेव
देवस्तस्य ग्रहणात्पूर्वकम् यस्मिन्काले भवेद्दक्षस्तस्य यो
ष्व समागमः नैवेद्यं साधकस्त्वात्मपूजां सामयिकीं च
रेत् स्नात्वा विलिख्य परशोभिभूमौ यंत्रं लिखेच्छिवे सिंदू
रेण महादेवि सर्वशापनिवारकम् त्रिकोणं विंदुसंयु
क्तः षट्कोणं महेश्वरि वृत्तमष्टदलं देवि भूगृहेण
सुशोभितम् विभाव्यं यंत्र देवेशि पूजां मंत्रे समारभेत्
आसनं देवि संशोध्य भूतशुद्धिं विधाय च प्राणायाममथ
मातृकैश्च देहे व्याप्य महेश्वरि श्रीं ह्रीं क्लीं पं सौः मंत्रे पूजा
क्रमो हि मानसिकः सर्वाशापूरकायादेव्याश्च कायमं
हेहि कुर्यात् दत्वा पुष्पांजलिं देवि चतुरस्रे समर्चयेत्
गणेशं धर्मराजं च वरुणं च कुबेरकं कपालं विकरा
लं च संहारं रुरुभैरवं महाकालं च कालाग्निं समु
न्मत्तभैरवम् अष्टपत्रेषु देवेशि पूजयेद्गन्धपुष्पकैः व
शिनी परमेशानि कामेश्वरी ततः परम् मोदिनी वि
मला चैवारुणा जयिनी तथा सर्वेश्वरी कौलिनी च
पूजनीया षट्कोणके वामावर्तेन देवेशि गंधाक्षतप्र
सूनकैः पीतपुष्पैर्महादेवि पयसाम भुनार्चयेत् गंगा
च यमुना चैव सरस्वत्यपि पार्वति त्रिकोणाशानकम

भु॰
सु॰ र॰
११
77

नः पूजनीया च साधकैः नीलपुष्पैर्वदध्याच्च हुतमस्तां
तु पुष्पकैः विन्दौ श्रीपरमेशानि पूजयेद्भुवनेश्वरीम् ईश्व
रेनेदितं हृदं च भैरवं भैरवेश्वरम् ॐ क्रीं श्रीं रां राहवे फट्
स्वाहा मंत्रेण साधकः विन्दौ संपूजयेद्राहुं त्रिवारं च स
शक्तिकम् नैत्रे वपूजयेद्देवि श्रीसूर्यं ग्रहनायकम् स
यमंत्रेण देवेशि गंधातन प्रसूनकैः नैवेद्याचमनीयाद्यै
स्ताम्बूलैश्च सुवासितैः नत्रोपरि महादेवि दद्यान्मूले
न साधकः रौप्यस्य च सुवर्णस्य रत्निका दश पार्वती
पीनवस्त्रं महादेवि दद्यान्मूलेन साधकः दत्वा येत्रस
पुरतो जपेऊर्ध्वोन्मुहेश्वरि अष्टुतार्धं न दर्पं वा सहस्रै
कं च वा जपेत् जपाद्दशांशतो होमः कार्यो सर्पिर्षताति
लैः नद्रे कवचं नाम्ना सहस्रं स्तोत्रमेव च पठेद्देविन
तो देवैः समशिवायै समर्पयेत् राहवे कुलसर्पाय गुरवे
साधको नमः जपं समर्प विधिपवननासाद्यंगमेश्वरि
सावलनाम्भोजयेद्देवि दक्षिणाभिः समर्चयेत् यपं च सू
नहे देवि श्रीदेवी भुवनेश्वरि ग्रहाणां ग्रहनायस्य सूर्यं
स्वामिनं तेजसः कोटिवर्षासहस्राणां पूजनाया फलमा
मुयात् इत्येष पटलो देवि गोपनीयो मुमुक्षुभिः सूर्य
ग्रहणां पूजनाय्यः साधकेष्टफलप्रदः इति श्रीभुवनेश्वरी
रहस्ये सूर्यग्रहणपूजाविधिपटलः समादशः १० ॥

श्रीभैरव उवाच शृणुष्वावहिता भूत्वा कथयामि महेश्व
रि रहस्यं भुवनेश्वर्याः पूजासारमनुत्तमम् चेशापराग
समये स्वात्मासाधकसत्तमः विलिख्य परागांयोमांलि
खेद्यंत्रं महेश्वरि त्रिकोणं बिंदुसंयुक्तं दशारं पंचकोण
कम् वृत्तमष्टदलं देवि भूगृहेणोपशोभितम् सिंदूरे
णा महादेवि लिखित्वा इष्टदेवता कुर्यात्तत्समस्तुहिं च
भूतशुद्धिं ततः परम् प्राणान्स्थापयेद्देवेशि न्यासं कुर्या
द्यथाविधिः भैरव्याद्यादिन्यासेन देहव्याप्य महेश्वरि
मातृकान्यासभेदेन श्रीकंठन्यासकेन च ध्यात्वा सोम
ष्टिनां देवीं सोमकोटिसमप्रभाम् पात्रस्थापनकर्मा
दौ कृत्वावाह्य महेश्वरीम् संशिवां मनसावाह्य राज्ञंचै
व सशक्तिकम् आवाह्य सोमं देवेशि स्वागतं चैतदीर
येन स्थापने संस्कृताविध्याने कुर्यात्षडंगं षडक
पाद्यार्घ्यादीनि विद्याद्वीपस्थान्स्वांसमारभेत् गणेशं
दिहदं बटुकं देवं किरीटिनम् दत्वा वलैनगंधाद्यैः पू
ज्यस्तेव चतुरस्रके मंगलां पिंगलां धन्यां भ्रामरीं भ्रमका
न्तया उल्काम् सिद्धां संकटां चैव सजनी पादपत्रके वामाव
र्तेन देवेशि पीनष्ठिं महेश्वरि श्रीमहात्रिपुरां चैव तथा
त्रिपुरमालिनी त्रिपुरां विजयां देविं तथा त्रिपुरवासिनी
पंचकोणोसदा पूज्यः पंचदेव्यो महेश्वरि वामावर्तेन गंधा

भु॰ धूपदीपप्रसूनकैः इदं देवि परं राज्यं वरुणां चक्रवे
स्तु॰ र॰ रकम् ईशानमग्निपलाशं च वायुविसंक्रमारकम् दशा
३८ देवसितैः पुष्पैः दत्वा वर्णेन पूजयेत् कामेश्वरीं विशेष
78 तं पूजयेद्रूगमालिनीम् त्रिकोणे साधको देवि पीतपुष्पै
विशेषतः सर्वानंदमयीं चक्रे वै देव पूजयेत्ततः सेश्वरीं॰
भुवनेशानीं श्रीदेवीं भुवनेश्वरीम् ईश्वरं च महाकृष्टका॰
लाग्निभैरवेश्वरम् वरंचैवांकुशं चैव कलाः षोडशका
लप्या मालां च पूजयेत्तत्र त्रिंचैव समर्चयेत् देवैनि
वेदितानां धातृत्तप्रसूनानि विनानत् धूपदीपादिनैवे
द्यताम्बूलादीन् समर्पयेत् न्यासं कृत्वा जपेन्मूलमप
मार्थं सुरेश्वरि तदर्धं वा सहस्रैकं जप्त्वा होमं दशांशतः
वर्मैनाम सहस्रादि स्तोत्रपाठं चरेत्ततः इत्याद्यंत्रापदे
वे शिरोण्यसर्गान्नलांशिवे गुह्यवेदेवदेवेभ्यो जपं मे श्री
समर्पयेत् संहारमुद्रया देवि देवदेव्याविसर्जयेत् प्र
नयापूज्यया देवि श्रीदेवीभुवनेश्वरीम् साधकः पूज
यन्नसमान्द्रवो भवेत् नित्यपूजाविधायावत्कोटिलि
ङ्गमहेश्वरि यत्फलं तत्फलं सम्यः सलभेत्पूजयानया
पुरश्चर्यासहस्रं च वाश्वमेधायुतस्य च फलं भवन्ति देवेशि
वेदपुरश्चरणापूजयाः वेदपुरश्चरणपूजयाः परलोके विद्युल्लेभः
गोपनीया विशेषेण नान्यथा सिद्धिहानिदः ॥ इति श्रीभु

श्रीभैरव उवाच शृणु देवि प्रवक्ष्यामि श्रीदेवीसारमुत्तमं
नवरात्रार्चनं देवि गोपनीयं विशेषतः चैत्राश्वयुजमास
योः शुक्ले पक्षे नवदिनानि च पूजयेद्भुवनेशानीं सिद्धि
हानिस्त्वनान्यथा प्रतिपन्निवसे शुक्ले प्राप्ते सौहृल्लिके
शुभे उत्थापयेन्नाम्ना श्रीस्नात्वा आगमार्चनस्थलीम् समा
यत्निमकर्मोदेन वेदीं वरेच्छिवे चतुष्कोणामेकह
स्तां सर्वतो नीवसुन्दरम् विलिप्य नवदेव्यादौ लिखेद्यन्त्रं
महेश्वरि त्रिकोणं बिन्दुसंयुक्तं षडस्रं ह्यष्टमण्डलम् अष्ट
पत्रं पद्मगेहं श्रीचक्रं नवराणिकम् एवंसंकाम देवेशि
भूतस्थारिकं चरेत् विधाय मातृकान्यासं मन्त्रन्यासं
ततः परम् षोढान्यासं महेशानि यन्त्रपूजां वरेच्छिवे ग
णेशं नन्दिनं दुं चक्रमारं वीरभद्रकम् चत्वरस्रे सितैः पु
ष्पैर्गन्धादीपैः समर्चयेत् ब्राह्मी चैव सर्वाणी चैव कौमारी
चापराजिता वाराही नारसिंही च तथैवेन्द्री भैरवी नवाश्र
पूपत्रीषु संपूज्या वामावर्तेन पार्वति सर्वैश्वर्यप्रदा देवी
तथैव भगमालिनी वामावर्तेन संपूज्यः षट्कोणेषु ना
यकांन्नमेः त्रिपुरां त्रिपुरेशानीं तथा त्रिपुरमालिनी त्रि
कोणे पूजयेद्देवि ईशानादिक्रमेण तु सर्वानन्दमयं च
क्रे वै देवं भुवनेश्वरी श्रीदेवी परमेशानी पूजयेत्तापको
नमः ईश्वरं परमेशानी पूजयेत्तु पार्वति गंधान्नसम्

भु.
स्व.२.
८.
60

नाद्यैर्धूपदीपादिनर्पणैः तद्वैवद्धरमानीयतत्तत्तं परम
म्नमम् सौवर्णं रजतं ताम्रं मृण्मयं वा महेश्वरि मूलेना
पायसान्नयंतीर्थो मा वाहयेत्ततः गंगे च यमुने चैव गो
दावरि सरस्वति नर्मदे सिंधु कावेरि जलेऽस्मिन् संनिधिं कु
रु तीर्थानी निसमावाह्य यंत्र कुंभे महेश्वरि वेदं वेतत्र
संस्थाप्य घटे प्राणान्समर्पयेत् आवाह्य सशिवां देवीं त
त्र प्राणान्समर्पयेत् इन्द्रादीं लोकपालांश्च पूर्वं पश्चिमयोः
शिवे दक्षिणोत्तरयोश्चैव मीशानादिक्रमेण च ऊर्ध्वमो
यश्चैषिनादौ सर्वे गंधवर्चार्चयेत् पैलुगाशिवेहस्मा
वटां तं तूलवाणिणी चामुंडां च कूष्मांडी स्कंदमाता
महेश्वरी कात्यायनी कालरात्रिर्महागौरी च सायकैः देव
हूती न वा स्यां च नवदुर्गाः समर्चयेत् मूलमंत्रेणांस
म्यमूलविद्यां समभ्यर्च्य सेश्वरं परमेशानि देवीं श्रीभुव
नेश्वरीम् घटे समभ्यर्च्य गंधाद्यैर्दीपधूपप्रसूनकैः नैवे
द्यावमनीयाद्यैस्ताम्बूलैश्छत्रचामरैः मूलविद्यां समभ्य
र्च्य वेदिकायां च वाचयेत् यवाम्बूलेन देवेशि मूलमं
त्रेण मंत्रितः तदग्रे पंचवातिश्च कुमारीश्च जपेत्ततः पा
द्यार्घ्यमधुपर्काद्यैः गंधाक्षतप्रसूनकैः माल्यैराभरणै
र्दिव्यैर्भक्ष्यैर्भोज्यैश्च पायसैः संतर्प्य विधिवद्देवि वदायेज्ज
पमारभेत् जपांते शांश्च होमं कुर्यान्नामपकसतमः त्रि

कोणांकुशाउमापूर्वं हस्तेकेन हविस्तनम् त्रिकोणानव॰
सप्येवंदनेन विभावयेत् मध्येविंदुलिखेद्देविश्रीरे
वीपूजयेच्छिवां रांरांत्रं स्वग्ग्येस्वाहा समावाह्य विभा
वयेत् गेंफ्रंफ्रंहः जटाभारभास्वराग्रेहि प्रज्वलप्रज्व
लतिफट् गेंस्वाहा वह्निर्निर्मंत्र्यपार्वति होमंकुर्या॰
हूनतोरतिलपुष्पैर्मनोहरैः संतर्प्यदेवतां देवि मधु
तीरतिलाज्जुभिः ब्रह्मणान्भोजयित्वा वदक्षिणाभि
स्तोषयेत् वटर्यैकवचस्तोत्रपाठं कुर्याद्विशेषतः ज
पंगुह्यभ्यः श्रीदेव्यैसशिवायैसमर्पयेत् यथावंपूजयेदे
वींश्रीदेवींभुवनेश्वरीम् नवम्यांतं महेशानि सनस्ना॰
तां महेश्वरः नवम्यां स्वर्णपुष्पाणि नवरौप्यप्रसूनक
न् दद्याद्देव्यैवटस्थानं नवमुद्राभिरीश्वरि प्रणाम्यदे॰
वदेविसाष्टांगां योनिमुद्रया समर्पयेत्तापकायवंदे
संहारमुद्रया यथावत्पूजयेद्देवि समयेपरमेश्वरीम् स
प्रवभगवान्लोके विचरेद्भैरवोयथा निलयपूजाजपो
दानेगंगास्नानमहेश्वरि गजाश्वरथदानेन भूदानेभ
स्मरग्रहे नवरात्र्यर्चनस्यापि कलांनार्हंति षोडशीम्
इदंपूजारहस्यंते भाषितंभक्तिभावतः स्वप्रकाशम
दानव्यंगोपनीयं स्वयोनिवत् इत्येषपटलोगुह्यः सर्व
तेषुगोपितः नवरात्रिदिनार्चायैलस्यकोटिफलप्रदः

भु॰
सं.र.
८
८०

इति श्रीभुवनेश्वरीरहस्ये नवरात्रिपूजाविधिपटलो
विंशः २० ॥ श्रीभैरव उवाच अथ वक्ष्यामि देवेशि प्र
णां संक्रान्तिकीं शिवे भुवनेश्या महापूजां पूजाकोटि
फलप्रदाम् यस्मिन्नह्नि रविर्देवि संक्रमेत्तु गणपवर्धने
कन्यां तस्मिन्दिने स्नात्वा साधकोत्तमसाधकः नित्यपूजां
समासाद्य चरेत्संक्रान्तिपूजनम् पूर्वसंकल्पदेवेशि प्र
णवाद्यादिकं चरेत् ऋष्यादिकं ततः कृत्वा मातृकामा
समेव च षोढान्यासं ततः कृत्वा ध्यायेच्छ्रीभुवनेश्वरीम्
देवीं ध्यात्वा महादेवी श्रीचक्रे परमं लिखेत् त्रिकोणं
बिन्दुसंयुक्तं रसकोणाष्टपत्रकम् षोडशं चाष्टपत्रं च धरा
गेहयुतं लिखेत् सिन्दूरेणातिभाव्याद्यौ पात्राणि स्थाप
येत्ततः योगपीठार्चनं कुर्याद्यं वै देवी शिवांकिनाम
समावाह्य महादेवि मुद्राश्चैव प्रदर्शयेत् पूजयेत्क्रमा
न्तस्यां फडित्यशानि वक्त्रेव गणेशयमवरुणाः ऊवे
रसहिताः शिवे चतुरस्रे तु सम्पूज्याः पीठपृष्ठैः महेश्व
री ब्राह्मी च वैष्णवी चैव कौमारी चापराजिता वाराही ना
रसिंही च तथैन्द्री शांभवे ततः पूजनीया दलेष्वष्ट
स्वर्घ्यधूपकैः नंदा भद्रा किनी धात्री अघोरा च महार
री सिद्धिका पूजनीया च वह्निः षट्कोणके शिवे गंधार्घ्य
पुष्पधूपाद्यैर्वामाद्यैस्तैर्नपार्वति यातनी डाकिनी चैव

शाकिनीगुप्तयोगिनी हाकिनीलाकिनीपूज्यामध्य
षट्कोणकोणतः गंगांचयमुनांचैवतनीयांचसरस्व
ती त्रिकोणेपूजयेदेविसाधकोमंत्रसाधकः सर्वो
त्तंदमयेचक्रेचैवदेवेपरमेश्वरि श्रीदेवींपूजयेदेविसा
धकोभुवनेश्वरीम् ईश्वरंचैवकालाग्निंदेविश्रीभुव
नेश्वरम् गंधाक्षतप्रसूनाद्यैर्नैवेद्याचमनीयकैः व
ह्निश्वापरमात्मानौ लाभ्लक्षत्रचामरैः समभ्यर्च्य
तांचस्वविंदेदद्यान्महेश्वरि स्वर्णरौप्यादिपुष्पाणि
कामाप्याव्रतश्चैवच निवेद्यमूलमंत्रेणसंक्रांतिकल
शेनथा विंदेदेवीसम्वेन्मंत्रीमाशिवाहस्तितानतनाम्
एवंवदेविसंकल्पजपेऽत्रपाद्यथाविधिः जपाद्दशां
शतोहोमः कार्योसर्पिर्यवांकुरैः वर्मनामसहस्राणि
स्तवपाठंप्रकल्पयेत् समर्प्यदेव्यैतत्सर्वंविप्रान्संभो
जयेत्ततः विशेषतः साधकांश्चसाधकोमंत्रसाधकः म
धेवदत्तिगांदत्वाप्रणमेद्योनिमुद्रया इत्येवंपूजयेद्दे
वींकन्यासंक्रांतिवासरे गोदानेकोटिसंदर्शफलंभव
तिपार्वति सप्तजन्मानि योदेवींपूजयेन्नित्यकर्मणा
यत्फलंतत्स्नानस्यायोभवेत्संक्रांतिपूजया इत्येषपरर
लोदेविगस्याद्भुतलेनरः परम् श्रमक्तैर्ध्यानदाननयोगो
पनीयश्चसाधकैः इतिश्रीभुवनेश्वरीरहस्येकन्यासं

भु॰ क्तो निशपूजाविधिपटलः एकविंशः २१ ॥ श्रीभैरव उवाच
स॰र॰ अथ वक्ष्यामि देवेशि शक्तिपूजां यथाविधिः नत्वा श्रीभु
८२ वनेश्वर्याः सारात्सारतरं परम् दिनेषु मे महादेवि सा
धनार्चनसंकुलीम् समाप्य नित्यकर्मादौ निशादौ
शक्तिमर्चयेत् श्रीशक्तिपूजामात्रस्य ऋषिः प्रोक्तः सदा
शिवः पंक्तिश्छन्दः समाख्यातं देवता भुवनेश्वरी ऐं बी
जं सौः तथा शक्तिः क्लीं कीलकमुदाहृतम् धर्मार्थका
ममोक्षार्थे विनियोग इतीरितः आसनं चैव संशोध्य
भूमिं संशोध्य साधकः भूतशुद्धिं विधायाथ प्राणाय
ामविधिं ततः सदाशिवविन्यासेन मातृकन्यासकेन
च षोढान्यासं क्रमेणैव देहव्यापि महेश्वरि भूमौ यंत्रं लि
खित्वा तु सिंदूरेणाथ चंदनेः विंदुत्रिकोणं षट्कोणं वृत्तेना
गदलांकितम् देवेशि भूगृहं शक्तिपूजायंत्रमुदाहृत
म् यंत्रं विलिख्याथ निदीर्घे विस्तृता परमेश्वरि सशक्ति
परशक्तिवानग्रांस्तु कंकणांशिवे मालाभरणशोभा
ढ्यां स्वर्णकंकणराजिनाम् स्नानामानीय देवे
शि स्वयं नग्नोत्र साधकः गणेशं धर्मराजं च वरुणं च कु
बेरकम् समभ्यर्च्य साधको गंधाक्षतपुष्पः सशक्तिकः
करालं विकरालं च संहारं रुरुभैरवम् कालाग्निं च महा
कालं सम्मन्मनभैरवम् अष्टपत्रेषु संपूज्य गंधाक्षत

स्तनकैः त्रिपुरां भैरवीं नाराचालां च समन्वितां प्रिये भगमा
लां च षड्कोणे पूजयेदंगषट्ककैः षड्कोणां चैव संपूज्य त्रि
कोणं पूजयेत्ततः गंगां च यमुनां देवि तन्मीयां च सरस्व
तीं गंधादिभिः प्रपूजनाद्योः संपदीपादितर्पणैः विंदौ सम
र्चयेद्देवि देवीं श्रीभुवनेश्वरीम् ईश्वरं चैव कालाग्निका
मराजं महेश्वरि गंधाद्यैश्च समभ्यर्च्य नवनं ठारवं चरेत् +
भूत्वा न्यासार्थं मंत्रेण निबध्वाशाः समूलतः शक्तिदेवी
मयीं ध्यात्वात्मानं चैव शिवमयं स्मरेत् यंत्रे शक्तिं निवेशयात्
नदद्विणाकरां नरे उपविश्य स्वयं चैव पूजां कुर्याद्यथा
विधिः मूलमंत्रेण देवेशि गंधाद्यैः प्रपूजनकैः हृल्लेखा
मस्तके पूज्य करालीं ऊं नलेनया ललाटे विकरालीं च
भ्रुवोर्श्चोमा सरस्वती नेत्रयोः कर्णयोश्चैव श्रीः पूज्या
परमेश्वरि देवी दुर्गा नासिकायां समाचाराणयोस्तथा
मुखे लक्ष्मीः वरदे देशाग्रे निश्चस्कंधयोः स्मृतिः धृतिश्च
हस्तयोर्देवि श्रद्धा च नाभिः पार्वति ऊरुयोः सम्मतामे
यामतिः ऊंतामहेश्वरिः कांतिश्च पार्श्वयोर्देवि पूज्यया
पृष्ठदेशके नाभावनंगरूपा च योनौ भुवनपालिका
अनंगमदनादेवि समभ्यर्च्यानुगुह्यदेशके कुचयोर्भुवनवे
गा च ज्वालास्थानंगवेदना नेत्रयोः सर्वशिशिरा समभ्यर्च्य
पादयोस्तथा अनंगमेखलादेवि साधके मंत्रसिद्धये

भु॰ पातादिमर्घपर्यन्तेनाग्रे श्रीभुवनेश्वरी पूजनीया महा
स्व॰र॰ देविं गंधान्नप्रसूनकैः विविधैः कुसुमैर्देवि भक्ष्यभोज्यै
८२ र्विशेषतः इक्षुणा विविधाहारैः शक्तिसंतर्पणार्वति
83 भगां सम्मुखमूलेन लिंगं संपूजयेत्तथा आत्मानं शिव
रूपं तं शक्तिं देवीस्वरूपिणीम् विभावयेन्महेशानि सा
धकः सर्वसिद्धये ततः स्तौ वीजयेन्मूलं यथाशक्त्या महे
श्वरि तेन सान्तर्पयेद्धीमान् देवीं श्रीभुवनेश्वरीम् सम्पूज्य
विविधैः पुष्पैः प्रणमेद्योनिमुद्रया विसर्जयेत्ततो शक्तिं
नत्वा संहारमुद्रया इत्येष पटलो देवि शक्तिपूजाप्रका
शकः प्रदातव्योऽप्यभक्ताय गोपनीयः स्वयोनिवत् ॥
इति श्रीभुवनेश्वरीरहस्ये शक्तिपूजापटलो द्वाविंशः २२
श्रीभैरव उवाच अथातो देवि वक्ष्यामि कुमारीणां च पूज
नम् यं विधाय कलौ मंत्री सर्वसिद्धीश्वरो भवेत् मंत्री
स्नात्वा शुद्धात्मा कृत्वा देवि कर्मार्चनम् कृपां नवकु
मारीणां पूजामाश्विनमासके प्रतिपादिवसे मंत्री कुमा
रीस्समनोहराम् अभ्यंगस्नानसुस्नानो पूजासदनमान
येत् देवतासन्निधौ बालामुपवेश्य समर्चयेत् गंधाक्ष
तान्नैर्धूपदीपैश्च कदलीफलैः भक्ष्यभोज्यान्नपाना
द्यैः क्षीराज्यमधुमांसकैः कदलीनारिकेलादिफलैस्तां
परितोषयेत् सशक्तिकः स्वयं देवि यौवनोल्लाससंयुतः

यथाशक्ति जपेदेकोनरहृद्यान्यथवामनम् बालामलंकृ
तांपश्चपश्चिनयेत्तेष्ट देवताम् ततस्तांदेवतां तु ध्यानम
स्तूत्यविसर्जयेत् द्वितीयांयाद्विवर्षांनामेकवर्षावध
जयेत् एवंतिथिकुमारीवत्पजेत्सर्वं दिने विनाः नवा
न्यामेकवर्षादिनवर्षान्तकन्यकाः बालाशुद्धावलति
नामालिनीववसुंधरा सरस्वतीरमागौरीदुर्गाचनव
कीर्त्तिनाः त्रिनारायेन्नमोन्तैस्तुदेवतापदयुग्मैः ना
मभिः सवनत्रयैः पूजयेत्ताः पृथक् पृथक् वटुकंप
चवर्षंचनववर्षंगणेश्वरम् गंधपुष्पाक्षताक्षतैर्यथा
यथाविभवविस्तरम् अभ्यर्च्यदेवतांतुध्यापादार्घैः परि
तोषयेत् स्वकार्यफलसिद्ध्यर्थं विनशाप्यविवर्जितः
नवरात्रंजपेदेकोनरहृद्धिक्रमेण च नवरात्रिकतोऽ
जादेवीदेव्यैसमर्पयेत् तांबूलरत्नानिदत्वाकुमारीणां
विसर्जयेत् एवंनवकुमारीणामर्चनंप्रतिवत्सरम् यः
करोतिसगुणात्मा देवताप्रीतिमाप्नुयात् मनोभिल
षितंप्राप्य निवसेत्तवसन्निधौ इत्येषपटलो देवि कुमा
रीपूजनात्मकः गुह्याद्गुह्यतरो गोपनीयः स्वयो
निवत् ॥ इति श्रीभुवनेश्वरीरहस्ये नवकुमारीपूजा
विधिस्त्रयोविंशः पटलः २२ श्रीदेव्युवाच भगवन्परमे
शानसर्वागमविशारद वदविस्तारतोदेवप्रयोगात्म

भृ. पिचेद्भूया श्रीभैरवउवाच शृणु देवि प्रवक्ष्यामि प्रयो
स्व.र. गान्सर्वकामिकान् यानि धायकनो शास्त्रं साधकः सि
२४ द्धिभाग्भवेत् स्तम्भनं मोहनं चैव मारणाकर्षणे तथा
84 वशीकरं तथोच्चाटं शान्तिकं पौष्टिकं तथा एतेषां सा
धनं वक्ष्ये जगतां हितकाम्यया शुभकायनयानमेन
हाष्टयं करावन रवौ ग्रहणायशयनाङ्गनाप्रेनालयेम
धीः मूलं साधकप्रवाम्भजपेद्युतसंख्यया होमं जाती
फलैः पीतैः पुष्पैश्च घृतमिश्रितैः शत्रुसैन्यादिस्थाना
वादिनां स्तम्भनं भवेत् इति स्तम्भनम् सोमे मध्याह्न
समये स्नात्वा कूपजलेन तु कूपान्तिके मन्त्रं जप्त्वा साध
को युतसंख्यया होमयेत् तनभिश्चं च माहिषं दधिशर्कर
म् भस्मना तिलकं कुर्यान्मोहयेद्भुवनत्रयम् इति मोहन
म् भौमे भद्रा रात्रौ समये चतुष्पथगतः सुधीः जपेन्मूलम
युतं च होमयेद्घृतपायसम् रक्तचन्दनमिश्रं च स्त्रीकेश
सम्मिश्रितम् शत्रुकालसमानोऽपि म्रियते मेष्यनिमास्य
या इति मारणम् बुधे निशावसाने तु गत्वा श्मशानालये
जपेत् सहस्रं मूलमन्त्रेण होमयेद्घृतशर्करम् कलि
काः सहस्राणि बिल्वपुष्पाणि पार्वति रम्भाद्य अप्सरसो वा
पि भवेदाकर्षणं ध्रुवं इत्याकर्षणम् गुरौ सूर्योदये गत्वा
नरा नारी च साधकः मूलमन्त्रं महादेवि जपेद्युतसंख्यया

होमः सर्पिर्दधिक्षीरमध्वाक्तामालतीपुष्पैः श्रीफलैः सह
मारे विवशयेद्भुवनत्रयम् इति वशीकरणम् ५ मुक्ते नि-
शामध्ये नग्नावट्टमूले जपेन्मन्त्रम् अयुतं साधको भ-
क्त्या होमः कार्यस्तु सविषा टघाइनाविमिश्रितेन गोमू-
त्रेण चणकैः शत्रोर्मन्त्रदशांशेनापि भवेदुच्चाटनं ध्रुवं
इत्युच्चाटनम् ६ प्रातः प्रभातसमये कृत्वा कर्माह्निकं सु-
धीः स्वगात्रावनशय्यां तु जपेन्मन्त्रायुतं शिवे होमयेत्स-
र्पिर्भोजनं सहस्राणि वनदेश ग्रहाणां देवकोपानां च
नानारोगाणां तथा उपद्रवाणां सर्वेषां भयानां नृपतेस्त-
था क्रूराणां मतिदुष्टीनां महाशान्तिः प्रजायते इति शा-
न्तिकम् ७ सर्ववारेषु सर्वं च जपेन्मन्त्रं सदायुतम् होमं
येत्सर्पिषा तैलमिश्रं वै दधिमिश्रितम् पायसं तक्रमिश्रं
च मीनमांससमन्वितम् देवतानां मनुष्याणां रोगाणां
नां महेश्वरि ब्रह्मादीनां नृपादीनां महापुष्टिः प्रजायते
इति पौष्टिकम् ८ अतः परं प्रवक्ष्यामि हि विधं कामनाव-
हं होमस्य तर्पणं कार्यं सर्वकामार्थसिद्धये स्थण्डिले
मण्डलं कृत्वा सिंहस्थेन च कुंकुमैः मूलमन्त्रेण ततो देवि जपे-
त्स्वस्वाश्रसाधकैः ततो देवीं समावाह्य वह्निरूपेण संस्थि-
ताम् साधयित्वा चरेद्धोमं दधि सिद्धार्थतण्डुलैः सह
ते केन विधिना वशीभवति भूमिपः मन्त्री त्रिमधुरोपेतै-

मु·
स्व·र·
८५
८६

ऽनाख्यं समिद्धैः ब्राह्मणान्वशयेत्क्षौद्रेण पार्थिवानां च
होमतः पलाशवृक्षेण मन्त्री मेधाविनः कुष्ठदेवादि मार्जा
रमांसयुक्तेन मधुना च घृतेन च सहस्रं जुहुयात्क्षौद्रं
साधनात्सर्वसिद्धये विद्याकामी च वरे होमं शर्करा घृतपा
यसैः पंचविंशतिसंजप्तजलं प्रातः पिबेन्नरः सर्वाणमे
हनी यज्ञांकवीनामग्रणीर्भवेत् रजस्वलायावस्त्रेण
मधुना मिश्रितेन च होमं कृत्वा महादेवि त्रैलोक्यं वश
मानयेत् नागवल्लीवरे होमं मधुना सहसापिष्टा घृ
तैक विधानेन सिद्धिस्यादृष्ट्याश्रिये मद्यमार्जारमांसे
न मधुना सघृतेन च चाण्डालकेशयुक्तेन भवेदाकर्ष
णं ध्रुवम् कुर्याच्छागलमांसेन घृतमधुसमन्वितम् हो
मं सहस्रकं कृत्वा स्तम्भनं सम्भवेद्रिपोः शशकस्य मां
सेन होमं कृत्वा यथाविधिः नराश्चेद्भवेत्सद्यो मरणा
न गतेरिति कनककाष्ठयोगेन विनाशने च मोत्रि
कः कोकिलाकाकपत्राभ्यां शत्रोरुच्चाटनं भवेत् मो
हनार्थं त्रिजगतां जुहुयान्मीनकेटका सप्तमोत्तं श्री
तिनाशाय चिताभस्मन होमयेत् उलूककाकपत्रा
भ्यां गर्भपातो परिस्त्रियः विल्वपत्रसमालाज्यमातमे
कं नित्यं नरम् अतिवेतालमेन्द्रान्तर्पशपरिवर्धक
वं धवककमस्यमाज्येनाहुतन्द्रालामसमन्वितम् सौभाग्यस्य·

वनेश्वरीरहस्ये चंद्रग्रहणप्रयोगविधिपटलोष्टादशः
श्रीभैरव उवाच कथयामि नव श्रीनाथ रहस्यं देवदुर्लभ
म् ततः श्रीभुवनेश्वर्या भूकम्पाचीनमुत्तमम् पत्तां
कम्पने भूमिदैवस्य रभयंकरी सप्तदुर्लभः कालः पूजा
यामपि प्राप्नोति उत्थाय साधकः स्नात्वा कृत्वा विष्टरशो
धनम् विलिख्य तत्र श्रीचक्रं यथावद्दर्शितं मया विदु
त्रिकोणं संयुक्तं रसकोणसहितं कम् अष्टपत्रं ततो बहि
र्लिखेद्भूमंदिरं प्रिये एतद्भूकम्पपूजायामग्रे देवि
सर्वदुर्लभम् इत्थं विलिख्य श्रीचक्रं भूतशुद्ध्यादिकं चरेत्
मातृकान्याससभागेन देहदेवमयं चरेत् ध्यात्वा देवीं
भूमिरूपां शोषरूपं महेश्वरम् मनसावाह्य मूलेन सं
शिवां भुवनेश्वरीम् भूमिं संशोध्य मावाह्य तत्र पूजां
समारभेत् संकल्प्य साधकः कुर्यान्न्यासान्यामत्रयं शिवे
पात्राणि स्थापयेत्तत्र देवीं संतर्प्य निस्सवत् योगपीठार्च
नं क्रूराक्षं पूजयेच्च नरश्रेष्ठकम् गणेशं धर्मराजं च कुबेरं वरु
णः ततः दत्त्वा बलिं तेन संपूज्य वटुकं तोरेषु साधकः करा
लाय फडित्येवं तत आदिग्बंधनं चरेत् अणिमाद्यष्टसि
द्धीश्च पूजयेदष्टपत्रके वामवर्तेन गंधाद्यैः सितपुष्पैर्य
थाविधि गंगायै नमः इत्येवं तत्र बीजैस्त्रिरावर्तेन सर्व
रत्नाकरे वक्रे यत्न संतर्प्य साधकः श्रीदेवीं सशिवां ध्याना

भु॰ भूमिदेवान्समर्चयेत् शेषकूर्ममनन्तश्चाज्यं समुद्रं च हि-
र॰ र॰ माचलं दिग्गजान्निरमाशान्ति पूजयेद्देवडस्रके गं-
८२ गां च यमुनां चैव वतनीयां च सरस्वती त्रिकोणे पूजये-
86 द्देवि तोभवस्तैस्तथाभृभिः सर्वानन्दमये चक्रे देवदेवे
79 कुलकौलिके साधकः पूजयेद्देवि देवीं श्रीभुवनेश्वरीं
ईश्वरं पूजयेन्नत्र महाप्रेतासनं ततः वरांकुशौ च पाशा-
वाभीतिं चैव प्रपूजयेत् भूमिसंपूजयेन्नत्र पूजयेत्कु-
लपर्वतान् गंधाक्षतप्रसूनाद्यैर्धूपदीपादितर्पणैः
नैवेद्याचमनीयाद्यैस्तांबूलैश्च सुवासितैः नह्निदैष
गैर्धनिकादशदयान्नसमिस्ये गोदानं साधकः कुर्या-
द्भूमिदानं तथैव च पंचाग्रे च जपं मूलं लमेकसाहस्रिक
वधि जपाद्दशांशतो होमः कार्यः सर्पिस्तिलेर्गुडैः वर्म
नामसहस्रादिस्तवपाठं चरेत्ततः देवदेव्योर्गुरोर्देवि स-
मर्च्यजयमादरात् प्रणम्य योनिमुद्राभिर्मन्त्राद्गुरुव-
दीश्वरि विसर्जयेद्देवदेव्यौ मंत्री संहारमुद्रया अश्वमेध
सहस्रस्य गोमेधायुतकस्य च सर्वाणि चलदानस्य फ-
लं यत्साधकेश्वरि तत्फलं चरितं मंत्री भूकम्पार्चनतो-
लभेत् इत्येष पटलो देवि भूकम्पार्चाप्रकाशकः गोप-
नीयो महादेवि कोटियज्ञफलप्रदः इति श्रीभुवनेश्व-
री रहस्ये भूकम्पपूजाविधिपटलः एकोनविंशः १९

स्वाप्नोति त्रैलोक्यं वशमानयेत् पंचविंशतिसंजप्तै
र्जलैः स्नाने दिने दिने आत्मानमभिषिंचेद्यः सर्वसौ
भाग्यवान्भवेत् जातीपुष्पाणि देवेशि जपहोमतं
शतम् षण्मासात्सिद्धिमाप्नोति शत्रूणां वंधनं भवेत्
देवकन्याश्च गंधर्वी नागकन्यास्तथैव च हूहा हाहा गन्ध
कामाय विकुलालिंगयेद्ध्रुवम् येनयरपत्रगायत्रीह*
वौं क्रौं हूं जपेद्धृदि दद्यात्पश्चबलिं मंत्री सिद्धिर्भवति
वांछिता कर्पूरागुरुसंयुक्तं कुंकुमं मांसपूसायितम्
गृहीत्वा तिलकं कुर्याद्राजवश्यमनुत्तमम् शालि
पिष्टमयीं कृत्वा तुलसीमधुनाचितम् जप्त्वा शतनिष्ठ
नष्टाणां भक्षयेद्धोमवासरे वशं नयति राजानं नात्र सं
वानरमेव च कंठमात्रोदके स्थित्वा वीक्षते रवाने
रविम् त्रिसहस्रं जपेन्मंत्री सिद्धां कन्यां लभेन्नरः श्र
वेतनं मंत्रितं मंत्री भुंजीत श्रीवशिद्धये लिंगविना भस्म
नां मायां समाप्य फलकादिषु नक्ता लेखयेद्यंत्रं स
त्वेरुस्येन गर्भिणी सप्तमासेन तद्रूपा लभते वस
वाञ्छितम् गंधर्वैः कृतमेरुत्वा त्रियमाप्नोति वांछि
तम् मंत्रेणानेन संजपन् श्रीयादवमनहम् भवेद
रोगो निपतं दीर्घमायुष्यवान्भवान् इत्येष पटलो देव
प्रयोगाणां प्रकाशकः न वस्तैदानमपात्मानो गोपनी

भु· स्व·र· ८९

86

यः स्वयोनिवत् इति श्रीभुवनेश्वरीरहस्ये प्रयोगवि-
धिश्चतुर्विंशः पटलः २४ श्रीभैरव उवाच शृणु दे-
वि प्रवक्ष्यामि यंत्रं त्रैलोक्याभिधम् यं ज्ञात्वा साधको
देवि सर्वसिद्धीश्वरो भवेत् पूर्वं संपुटितं कुर्याच्च
रस्रयुगं प्रिये चतुरस्रयुगमध्यस्थषट्कोणपरिवर्धये
त् अष्टदलं महादेवि कुर्यान्नाभिपुनः क्रमात् अग्र
लाकारयुक्तानि वृत्तं कुर्यात्ततः पुनः देवगंलाग्रसं
दष्टं लिखेदष्टदले ततः वृत्तं विधाय तद्बाह्ये कुर्या
द्वृत्तत्रयं पुनः तद्बाह्ये चतुरस्रं लिखेद्भूपुरमथो
गुरम् षट्के चतास्रोर्ध्वमध्वकमले विलिखेत्ततः वे
दास्रयुग्मस्वानां वानरेपि षपार्वति वृत्तं कुर्या-
महेशानि तथाभ्यंतरसंपिष्ट चतुरष्टाश्रष्टकोण
त्रिभुवनेश्वरी इत्थं यंत्रं विरच्य नालिखेन्मंत्रवि
वत्तणः पाशश्रीशक्तिकंदर्पकामशक्रौंदिशांकुशः
प्रणोमहान्तरो मंत्रस्ततः कामिनि रंजनि स्वाहान्तो
ष्टान्तरः सप्तविपरः कीर्तितो मनुः इमं मंत्रं हृद्यं दे
वि कोणेषु षोडशस्वपि लिखेन्नामं लिखेद्विपुनः
षोडशकोष्ठके क्रौं गौरि मद्रदयिते योगेश्वरि सर्वं
कर्मं फट् द्विपांतः षोडशार्णो यं मंत्रः सप्तकोराहृतः
इमं मंत्रं लिखित्वा वै षडाक्षागानि च सिद्धये अग्नीशान

रवायव्यकोणेषु मन्त्रविन्नमः कवचांतानि संलिख्य म
ध्ये नेत्रं लिखेद्बुधः चतुर्दिगंतकोणेषु चतुर्थांतं लिखे
त्प्रिये चतुरस्रस्य मध्ये च प्रकुर्यादष्टदलं सुधीः तन्मध्ये म
न्त्रराजं च पाशशक्तिं कुशात्मकम् साध्यकर्माविनिर्दे
विहंसः सोहमयो लिखेत् ग्रहाष्टकेसरस्थाने हंसमंत्रे
णासंपुटम् ईकारं संलिखेद्देवि षोडशस्वरसंपुटम्
पत्राग्रेषु च लिप्याशशान्तं कुशोस्य संदरी पत्रायो वि·
लिखेदेवि लयवरसुतं शिवम् फस्वदीर्घं च प्रतेनिलिखे
दुशपार्श्वकं पूर्व पश्चादहिमे हादेवि हृत् पुरमे लिखे
द्बुधः पाशांकुशोन्नेष्टवेरास्तदाह्यवेष्टयेत्पुनः पुन
लोमविलोमाद्यो मातृकाक्षरोऽस्य पार्वति वटार्गलमि
दं यंत्रं मे गिरिराजप्रभूते मतम् लिखित्वा भूर्जपत्रादौ यं
त्रमेतद्यथाविधि धारयेद्वामबाहौ वा कंठे वा नितम्
बिनि वशयेत्सकलान्मर्त्यान्विशेषेण महीपतीन् नी
लपत्रे विलिख्येतद्वटिकीकृतितत्पुनः साध्यप्रति·
कृतीक्षिप्य निर्मितां नापाहृदि मसेत् पात्रे त्रिमधुरापू·
र्णे निनिक्षिप्येनां निधानवित् सम्पूज्य गंधपुष्पाद्यैर्बं·
लिं निनिष्यपरविश्व मूलमंत्रं जपेत्संश्री नित्यमष्टसह
स्रकम् सप्तहाद्वांछितां नारीमाकर्षत्यमरं विठलम्
भूर्जपत्रे विलिखेत्तद्वटिकीकृत्य तत्पुनः लाक्षयाला

भु॰
श्व॰ र॰
८०
87

स्वरजनकां चैनैर्वहयेत्क्रमात् तत्क्रमोन्मस्तके प्रज
प्याद्भुवनेश्वरीम् संस्पृश्यं तं जपेन्मंत्रं दिवाकरस
हस्रकम् अभिषिंच्य त्रियं सांख्येव धीयाद्यंत्रमाशिषा
कांतिपुष्टिधनारोग्यश्रेयांसि लभते नरः भिन्नो विलि
ख्येत यंत्रं प्रजपेन्नित्यमादरात् भूतप्रेतपिशाचाद्याः
द्रवीत्ति तमपि तन्माः तद्विलिख्य शिरसा तोसा धयेद्वु
तेवटः पुत्रे हि स्तनद्भवात्तं जपमामोनि पार्थिवः इत्ये
षपटलो गुप्तो चर्यालप्रकाशकः प्रशाशितो मया
स्नेहात्तव गौप्यो मम मुक्तिभिः इति श्रीभुवनेश्वरीरहस्ये
वदार्गयंत्रविधिनाम पंचविंशः पटलः २५ श्रीभैरवः
अथ नाकथयिष्यामि रहस्यातिरहस्यकम् तत्वं श्रीभु
वनेश्वर्यां दशामी प्रजनं परम् दीक्षा गुरुः शिवे यस्त
दशमीमप्रकीर्तितं मजनं तस्य वस्यामि सर्वतंत्रेषु
गोपितम् दीक्षां गृहीत्वा विधिवत्तत्क्रोः लविवर्ता
णात् नरान्नां शिरमाराधयस्या पयेन्मनं ततः प्रक
दाप्तुणं परिवसेन्महतैं श्रुभदे तप्या गुरुमानीय देवेशि
शून्यागेहे वनेष्वथे श्मशाने वा वने वापि मठगृहे वापि
पार्वति तत्र भूमौ लिखेद्यंत्रं यथावद्दत्तने मया बिंदु
त्रिकोणं सप्तकंकं वसुकोणं सहस्रकम् अष्टपत्रेति दू
नं च भूगृहेणोपशोभितम् गुरोर्यंत्रे महादेवि सर्वसि

ह्रिकारं स्मरेत् सिंहरेणाविलिख्यो स्तु पूजयेत् ग्रुकमीश्वरी ·
गणेशं धर्मवरुणाः कुबेरमहिनाशिवे पूज्य ह्याय्याः स
पुष्पैः स्रगंधात्तनवरत्नैः अस्मिनांगो कृतस्रंडः कोपे
शोमंत्रभैरवौ कपालभीषणोदेवि संहारो वेदपत्रके
परमानंदनाथं च प्रकाशानंदनाथकम् श्रीभोगा
नंदनाथं च समयानंदनाथकम् गगनानंदनाथं च·
श्रीविश्वानंदनाथकम् भुवनानंदनाथं च श्रीलाला
नंदनाथकम् स्रष्टोकलगुरून्देवि पूजयेद्दलपत्रके
मदनानंदनाथं च श्रीलीलानंदनाथकम् महेश्वरा·
नंदनाथं पूजयेद् त्रिकोणके विंदौ गुरुं च संपूज्य गंधा·
क्षतधूपकैः नवाविंदौ स्तुभं देवि स्थापयेद्भक्तिपूर्वके
संपूजयेत्सम्मूलेन दक्षिणां कालिकाजेन महाकाले
यजेन्नवकामं कामीश्वरीं तथा गुरुं च परमो देवि पराप
र गुरुं ततः परमेष्ठिगुरुं चैव स्वगुरोर्मूर्ध्नि पूजयेत् सं·
पूज्य विविधैः पुष्पैर्माल्यैराभरणोत्तमैः दक्षिणाभिर्महे
शानि भक्ष्यैर्भोज्यैस्सलेह्यकैः चोष्यैः पेयैः स्तवैर्योस्तवलि
दानाच्च तर्पयेत् आनंदरससंपूर्णां गुरुं द्दष्ट्वा महेश्वरि
नत्वा देवेशि नंदनाथाः प्रार्थयेत्स्वमनोरथान् यथा पूजये
देवि स्वगुरुं पुष्पवासरे सम्व ··· सानाह्निवरेद्भुवनत्र
ये गुरुरेव परो मंत्रो गुरुरेव परो जपः गुरुरेव परा विद्या

भु.
भु.र.
८९
88

नास्तिकिंचिद्गुरुं विना यस्य न तुष्टो गुरुर्देवि तस्य नष्टा म
हेश्वरि येन संतोषितो देवि गुरुः स हि सदाशिवः यद्यद
द्यापि वेद्याद्गुरुस्तत्तत्समाचरेत् गुणं वाप्युपमीशा
निमाज्ञया शंकरार्चिते गुरुर्वेदनियन्तृत्वघत्वकार्या
त्साधको नमः विना गुरूपदेशेन न सिध्यति कलौ मनुः
तस्माद्गुरुं भजेद्ज्ञात्वा तोषयेत्समनेगुरुं गुरोर्यत्र परो
देवि निंदा यत्र प्रवर्त्तते कर्णौ तत्र पिधातव्यौ तो वा हरेत्पा
त्वायनेम गुरुर्देवि परो धर्मो गुरुर्देव परा गतिः गुरुम
भावयेन्नित्यं येन देवी प्रसीदति इतीदं दर्शितं तेम
वागमरहस्यकम् सारात्सारतमं देवि गोपनीयं प्रय
त्नतः इतीदं भुवनेश्वर्या रहस्यं गुरुमन्तमम् सारा
त्सारतरं देवि तत्तानां परात्परम् सर्वस्वं रहस्यं मेम
वागमनिधिं परम् श्रीकारसिद्धिदं देवि यस्य वीर्यक
रं तथा इदं सरहितं शास्त्रं षड्विंशः पटलं भवेत् रह
स्यानि रहस्यं च देवीरूपं विचिंतयेत् यद्गृहे वर्त्तते देवि
रहस्यं परमेश्वरि न तत्र देवि दुर्भिक्षं न दरिद्रं कदाचन
मारीभयं न तत्रास्ति वह्निचौराद्युपद्रवाः नैव च वस
ते लक्ष्मीः परिहृत्यापि निश्चला नैव च वसते देवि श्री
भुवनेश्वरी तथा रहस्यं पूजये देवि रक्तपुष्पैर्विशेषतः
गंधाक्षतधूपदीपादि नैवेद्यैः बलिं दत्वा नमः

शान्तिसाधकः सर्वसिद्धये तद्गृहं च भवेन्मूर्त्तां यत्नयान्म
विभूतिभिः गोमहिष्यादिभिर्देवि गजाश्वपरिपूरितम्
तद्गेहं देवतानां त्वं यत्र देव वर्त्तते सदा श्रीदेव्युवाच यत
या भुवनेश्वर्या रहस्यं वर्णितं मम कीर्त्तनात्सिनवदास
स्मि भक्त्यास्मि विश्रुतं तक सर्वपापहरणी यास्मि किम
मन्कथयामि ते श्रीभैरवः इतीदं भुवनेश्वर्या रहस्यं
परमेश्वरि सर्वसिद्धिप्रदं गोप्यं गोपनीयं महेश्वरि म
दातव्यमभक्ताय कुचैलाय दुरात्मने मूर्खाय दुष्टबुद्धि
नाय दीनाहीनाय पापवर्त्ति निंदकाय कुलीनाय हीन
नाय गुरुस्पृहया स्वप्रज्ञायान्यशिष्याय दत्ताकुशीभ
वेत्कलौ भक्ताय शुद्धचित्ताय कुलीनाय महेश्वरि
स्वशिष्याय च दातव्यं सीताय कुकाय पापवर्त्ति इदं रहस्यं
परमं भक्त्या तव मयोदितम् सर्वस्वं भुवनेश्वर्या गो
पनीयं स्वयोनिवत् इत्येष पटलो देवि दशाम्पर्शन
पर्शकः गुह्याद्गुह्यतरो गोप्यो गोपनीयो मम मन्त्रिभिः
इति श्रीभुवनेश्वरीरहस्ये दशाम्पर्शनविधिः षट्विंशः
पटलः २९ ॥ ॥ इति श्रीरुद्रयामले तंत्रे दशविद्या
रहस्ये श्रीभुवनेश्वरीरहस्यं समाप्तम् शुभम् ॥

89



भुवनेश्वरीरहस्य

नं० १५६८

2